संस्कृत-वार्ता:

04.01.2026

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तर प्रदेशस्य वाराणस्यां द्विसप्तति-तमायाः राष्ट्रिय-वॉलीबॉल-स्पर्धायाः आभासीयमाध्यमेन उद्घाटनावसरे अवोचत् यत् भारतं षडत्रिंशदुत्तरद्विसहस्र तमे वर्षे ऑलम्पिकक्रीडायाः आयोजनाय सिद्धतायै प्रयासरतो वर्तते।

· भारतेन वेनेजुएला-देशे सद्यः एव घटितानां घटनानां विषये भारतं गभीरा चिन्ता प्रकटिता। वेनेजुएला-देशस्य जनानां कल्याणाय सुरक्षायै च भारतं स्वसमर्थनं पुनः दृढीकृतवान्।

· प्रशासनेन भारतीय-नागरिकेभ्यः वेनेजुएला-देशस्य सर्वाः अनावश्यक-यात्रां परिहरतुम्, एका परामर्श-सञ्चेतना प्रसारितास्ति।

· बाङ्ग्लादेशस्य हिन्दु-बौद्ध-क्रिश्चियन्-यूनिटी-कौन्सिल् इत्यस्य नेतारः ढाका-नगरे बी. एन्. पी. इत्यस्य कार्यवाहक-अध्यक्षेण तारिक-रहमान इत्यनेन सह मिलित्वा अल्पसङ्ख्यकान् विरुध्य हिसायां चिन्तां प्रकटितवन्तः।

· ऋतुविभागेन दिल्ली हरियाणा चण्डीगढ पञ्जाब उत्तरप्रदेश बिहार ओडिशा राज्येषु प्रबल-कुज्झटिकायाः सञ्चेतना प्रसारिता।

<u>प्रधानमन्त्री वॉलीबॉल</u>

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् विभिन्नासु क्रीडासु भारतस्य प्रदर्शनं चतुर्दशोत्तर-द्विसहस्रतम-वर्षात् निरन्तरं समेधते । श्रीमोदी अद्य आभासीय-माध्यमेन वाराणस्याः 'डॉ. संपूर्णानंद-क्रीडाप्राङ्गणे' द्विसप्तति-तमायाः राष्ट्रिय-वॉलीबॉल-स्पर्धायाः उद्घाटनम् अकरोत्। अमुना उक्तं यत् भारतं षडत्रिंशदुत्तर-द्वि-सहस्रतमे वर्षे ऑलम्पिक-क्रीडायाः आयोजनाय सिद्धतायै प्रयासरतो वर्तते।

सः अवदत् यत् तस्य सर्वकारः राष्ट्रिय-क्रीडा-प्रशासन-अधिनियमः खेलो-भारत-नीतिः विंशति पञ्चविंशतिः इत्यादीनि क्रीडायाः क्षेत्रे अनेकानि परिवर्तनानि, परिष्कारान् च आनयति।

प्रधानमन्त्री अवदत् यत् देशस्य क्रीडा-प्रतिमानम् अधुना क्रीडक-केन्द्रितम् अस्ति, अतः चतुर्दशोत्तर-द्विसहस्रतम-वर्षात् परं क्रीडकानां सफलतायां महती वृद्धिः अभवत्। क्रीडायाः क्षेत्रे स्व-सर्वकारस्य प्रयत्नान् अधोरेखयन् श्रीमोदी अवदत् यत् सर्वकारः विविध- क्षेत्रेषु विषयेषु च कार्यं कुर्वन् अस्ति, येषु प्रतिभायाः अभिज्ञानम्, वैज्ञानिकप्रशिक्षणं, पौष्टिकभोजनं प्रदातुं, पारदर्शकं चयनं च अन्तर्भवन्ति।

प्रधानमन्त्रिणा उक्तं यत् देशः अपि तस्मिन् एव मार्गे अग्रे गच्छन् अस्ति इति।

वालीबाल्-क्रीडायाः विकासस्य च मध्ये साम्यं प्रदर्शयन् प्रधानमन्त्री अवदत् यत् वालीबाल्-क्रीडा तादृशी क्रीडा अस्ति या अस्मान् दलात्मकेन सह संयोजयति। अस्याः क्रीडायाः स्वभावः राष्ट्रस्य विकासगाथायाः सदृशः अस्ति, यस्मिन् योगदानार्थं सहकारस्य, तत्परतायाः च आवश्यकता वर्तते।

अद्यारभ्य जनवरी-मासस्य एकादश दिनाङ्कपर्यन्तं आयोज्यमानायाम् अष्ट-दिवसीय-प्रतियोगितायां, आदेशात् सहभागिता दृश्यते, यत्र विविधराज्यानां संस्थानां च प्रतिनिधित्वं कुर्वताम् अष्टपञ्चाशत् 58 दलानां भागरूपेण सहस्रतोप्यधिकाः क्रीडकाः भागं स्वीकुर्वन्ति।

<u>शिवराजः जी राम जी विधेयकम्</u>

ग्रामीण-विकास-मन्त्री शिवराज-सिंह-चौहानः अवोचत् यत् मनरेगा इत्याख्या योजना भ्रष्टाचारस्य पर्याय-रूपः अजायत्। यत्र श्रमिकान् प्रायः कोणस्थं विधाय तेषां शोषणं क्रियते स्म। अद्य नव-दिल्ल्यां वार्ताहर-सम्मेलने तेनोक्तं यत् कांग्रेस-दलं विकसित-भारत-रोजगार-आजीविका गारंटीमिशन-ग्रामीण इति जी राम जी विधेयकम् आलक्ष्य जनान् गुह्यति।

ग्रामीण-विकास-मन्त्रिणा आरोपितं यत् कांग्रेसदलं न केवलं मनरेगा योजनायाः अपितु भ्रष्टाचारस्य रक्षाम् अपि कर्तुम् इच्छति। श्रीचौहानः अवदत् यत् विशाल-आयव्ययसङ्कल्पना सत्यपि मनरेगा योजनया कस्यापि स्थायि–सम्पत्ति-सृजनम् ग्रामाणां दीर्घकालिक-विकासश्च नैव संवर्धितः। तेनोक्तं यत् नूतन-विधेयकेन श्रमिकाणाम् आर्थिक-स्थितिः भद्रतरा भविष्यति। ग्रामाणां विकासे सार्थक-योगदानम् अपि प्रदास्यन्ति।

## वेनेजुएला

वेनेजुएला-देशे सद्यः एव घटितानां घटनानां विषये भारतं गभीरां चिन्तां प्रकटयति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् तत्रत्य-स्थितिः निकटतया निरीक्षिता अस्ति। वेनेजुएला-देशस्य जनानां कल्याणाय सुरक्षायै च भारतं स्वसमर्थनं पुनः दृढीकृतवान्। नवदिल्या संवादस्य माध्यमेन, क्षेत्रे शान्तिं स्थिरतां च सुनिश्चेतुं, विषयान् शान्तिपूर्वकं समापयितुं सम्बद्धेभ्यः सर्वेभ्यः आह्वयत्। काराकस-नगरे भारतीय-दूतावासः भारतीय-समुदायस्य सदस्यैः सह सम्पर्कं कुर्वन् अस्ति तथा च सर्वान् यथा-सम्भव-साहाय्यं प्रददाति।

## वेनेजुएला परामर्शः

विदेशमन्त्रालयेन एका परामर्श-सञ्चेतना प्रसारितास्ति। यस्यां भारतीय-नागरिकाः वेनेजुएला-देशस्य सर्वाः अनावश्यक-यात्रां परिहरतुम्, काराकस-नगरे भारतीय-दूतावासेन सह सम्पर्के स्थातुम् च उक्तम् अस्ति। दूतावासस्य ईमेल संकेतो वर्तते cons.caracas@mea.gov.in तथा आपत्कालीन दूरभाष-सङ्ख्या अस्ति पञ्च,अष्ट-चत्वारि,एकं,द्वे-नव-पञ्च-अष्ट-चत्वारि-द्वे-अष्ट-अष्ट इति।

## बाङ्ग्लादेश-अल्पसंख्यक

बाङ्ग्लादेशस्य हिन्दु-बौद्ध-क्रिश्चियन्-यूनिटी-काउन्सिल इत्यस्य नेतारः ढाका-नगरे बी. एन्. पी. इत्यस्य कार्यवाहक-अध्यक्षेण तारिक-रहमान इत्यनेन सह मिलित्वा पूर्व-प्रधानमन्त्रिणः तथा बी. एन्. पि. इति दलस्य अध्यक्षायाः बेगम-खालिदा-जिया इत्यस्याः मृत्योः शोकं प्रकटितवन्तः। सभायां अल्पसङ्ख्यकनेतारः खालिदा जिया इत्येषा सुदृढा-नेता इति वर्णितवन्तः, या देशस्य लोकतान्त्रिक-आन्दोलने महत्त्वपूर्णां भूमिकां निभालितवती। तस्याः मृत्युः बाङ्ग्लादेशस्य कृते महती क्षतिः इति ते उक्तवन्तः, तथा च तारिक रहमान इत्यस्मै तस्य परिवाराय च सहानुभूतिं प्रकटितवन्तः। नेतारः देशस्य विभिन्नेषु भागेषु अल्पसङ्ख्यकानां समुदायानां विरुद्धं सद्यः एव घटितेषु हिंसाप्रसङ्गेषु वर्धमानानां समाह्वानानां विषये अपि चर्चितवन्तः।

ऋतु-सञ्चेतना

ऋतुविभागेन अद्य दिल्ली हरियाणा चण्डीगढ पञ्जाब उत्तरप्रदेश बिहार ओडिशा राज्येषु प्रबल-कुज्झटिकायाः नारङ्ग-वार्णिकी सञ्चेतना प्रसारिता। ऋतुविभागेन प्रोक्तं यत् मध्यप्रदेशे राजस्थाने उत्तराखण्डे हिमाचल-प्रदेशे झारखण्डे पश्चिमबङ्गाले जम्मूकश्मीरे लद्दाखे पूर्वोत्तर भागेषु च इयमेव-स्थितिः श्वः यावत् प्रवर्तिष्यते। सममेव ऋतुविभागेन आगामि द्वि-त्रि-दिनेषु दिल्ली हरियाणा चण्डीगढ पञ्जाब उत्तराखण्ड राजस्थान राज्येषु शीतप्रकोपस्य आशा प्रकटिता।

क्रिकेट्

अण्डर्-19 पुरुष-क्रिकेट्-क्रीडायां, गतरात्रौ बेनोनी-नगरस्य विलोमूर्-पार्क्-इत्यत्र तिसृणां-क्रीडा-श्रृङ्खलायाः आरम्भिक-युव-ओ. डि. आई.-क्रीडायां डी. एल्. एस्.-पद्धत्या आतिथेय-दक्षिण-आफ्रिकादलं भारतेन पञ्चविंशति-धवनांकैः पराजितम्।

।। इति वार्ताः ।।